Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ

ककारादिकालीसहस्रनामस्तोत्रम

संग्रहकर्त्ता

मन्नालाल 'अभिमन्यु'

प्रकाशक

मास्टर खेलाड़ीलाल

कचौड़ी गली, वाराणसी

मूल्यम्-५)

पूजा पाठ व ज्योतिष पुस्तको के लिए
नाथ पुस्तक भंडार दूरभाष 3275344
194, दरीबा कलां, दिल्ली 110006

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ

ककारादिकालीसहस्रनामस्तोत्रम् ।



ध्यानम्—

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम् ।
चतुर्भुजां खड्ग-मुण्ड-वराऽभयकरां शिवाम् ॥ १ ॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बराम् ।
एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम् ॥ २ ॥
कैलासशिखरे रम्ये नानादेवगणावृते ।
नानावृक्षलताकीर्णे नानापुष्पैरलंकृते ॥ १ ॥
चतुर्मण्डलसंयुक्ते शृङ्गारमण्डपे स्थिते ।
समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियम् ॥ २ ॥
तत्र मौनधरं दृष्ट्वा देवी पृच्छति शङ्करम् ।

देव्युवाच—

किं त्वया जप्यते देव ! किं त्वया स्मर्यते सदा ? ॥ ३ ।
सृष्टिः कुत्र विलीनाऽस्ति ? पुनः कुत्र प्रजायते ? ।
ब्रह्माण्डकारणं यत् तत् किमाद्यं कारणं महत् ॥ ४ ।
मनोरथमयी सिद्धिस्तथा वाच्छामयी शिव ! ।
तृतीया कल्पनासिद्धिः कोटिसिद्धीश्वरत्वकम् ॥ ५ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्तिपाताष्टदशकं चराचरपुरीगतिः ।
महेन्द्रजालमिन्द्रादिजालानां रचनां तथा ॥ ६ ॥
अणिमाद्यष्टकं देव ! परकायप्रवेशनम् ।
नवीनसृष्टिकरणं समुद्रशोषणं तथा ॥ ७ ॥
अमायां चन्द्रसंदर्शो दिवा चन्द्रप्रकाशनम् ।
चन्द्राष्टकं चाष्टदिक्षु तथा सूर्याष्टकं शिव ! ॥ ८ ॥
जले जलमयत्वं च वह्नौ वह्निमयत्वकम् ।
ब्रह्म-विष्ण्वादि-निर्माणमिन्द्राणां कारणं करे ॥ ९ ॥
पातालगुटिका-यक्ष-वेतालपञ्चकं तथा ।
रसायनं तथा गुप्तिस्तथैव चाखिलाञ्जनम् ॥१०॥
महामधुमती सिद्धिस्तथा पद्मावती शिव ! ।
तथा भोगवती सिद्धिर्यावत्यः सन्ति सिद्धयः ॥११॥
केन मन्त्रेण तपसा कलौ पापसमाकुले ।
आयुष्यं पुण्यरहिते कथं भवति तद्वद ? ॥१२॥

शिव उवाच—

विना मन्त्रं विना स्तोत्रं विनैव तपसा प्रिये ! ।
विना बलिं विना न्यासं भूतशुद्धिं विना प्रिये ! ॥१३॥
विना ध्यानं विना यन्त्रं विना पूजादिना प्रिये ! ।
विना क्लेशादिभिर्देवि ! देहदुःखादिभिर्विना ॥१४॥
सिद्धिराशु भवेद्येन तदेवं कथ्यते मया ।
शून्ये ब्रह्माण्डगोले तु पञ्चाशच्छून्यमध्यके ॥१५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चशून्यस्थिता तारा सर्वान्ते कालिका स्मृता ।
अनन्त-कोटि-ब्रह्माण्ड-राजदन्ताग्रके शिवे ! ॥१६॥
स्थाप्य शून्यालयं कृत्वा कृष्णवर्णं विधाय च ।
महानिर्गुणरूपा च वाचातीता परा कला ॥१७॥
क्रीडायां संस्थिता देवी शून्यरूपा प्रकल्पयेत् ।
सृष्टेरारम्भकाले तु दृष्टा च्छाया तया यदा ॥१८॥
इच्छाशक्तिस्तु सा जाता तया काली विनिर्मितः ।
प्रतिबिम्बं तत्र दृष्टं जाता ज्ञानभिधा तु सा ॥१९॥
इदमेतत् किं विशिष्टं ? जातं विज्ञानकं मुदा ।
तदा क्रियाऽभिधा जाता तदीच्छातो महेश्वरि ! ॥२०॥
ब्रह्माण्डगोले देवेशि ! राजदन्तस्थितं च यत् ।
सा क्रिया स्थापयामास स्व-स्वस्थानक्रमेण च ॥२१॥
तत्रैव स्वेच्छया देवि ! सामरस्यपरायणा ।
तदिच्छा कथ्यते देवि ! यथावदवधारय ॥२२॥
युगादिसमये देवि ! शिवं परगुणोत्तमम् ।
तदिच्छा निर्गुणं कान्तं सच्चिदानन्द-विग्रहम् ॥२३॥
शाश्वतं सुन्दरं शुक्लं सर्वदेवयुतं वरम् ।
आदिनाथं युगातीतं कालया संयुतमीश्वरम् ॥२४॥
विपरीतरतं देवं सामरस्यपरायणम् ।
पूजार्थमागतं देव-गन्धर्वा-ऽप्सरसां गणम् ॥२५॥
यक्षिणीं किन्नरीमन्याप्सुर्वश्याद्यां तिलोत्तमाम् ।
वीक्ष्य तन्मायया ग्राह सुन्दरी प्राणवल्लभा ॥२६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रैलोक्यसुन्दरी प्राण-स्वामिनी प्राणरञ्जिनी ।
किमागतं भवत्याऽद्य मम भाग्यार्णवो महान् ॥२७॥
उक्त्वा चौनधरं शम्भुं पूजयन्त्यप्सरोगणाः ।

अप्सरस ऊचुः—

संसारात् तारितं देव ! त्वया विश्वं जनप्रिय ! ॥२८॥
सृष्टेरारम्भकार्यार्थमुद्यक्तोऽसि महाप्रभो ! ।
वेश्याकृत्यमिदं देव ! कज्जलार्यप्रगायनम् ॥२९॥
प्रयाणोत्सवकाले तु समारम्भे प्रगायनम् ।
गुणाद्यारम्भकालो हि वर्तते शिवशङ्कर ! ॥३०॥
इन्द्राणीकोटयः सन्ति तस्याः प्रसवबिन्दुतः ।
ब्रह्माणी वैष्णवी चैव माहेशी कोटि-कोटयः ॥३१॥
तव सामरसानन्द-दर्शनार्थं समुद्भवाः ।
सञ्जाताश्चागतो देव ! चान्मार्कं सौख्यसागर ! ॥३२॥
रतिं हित्वा कामिनीनां नाऽन्यत् सौख्यं महेश्वर !
मां रतिर्दृश्यतेऽस्माभिर्महत्सौख्यार्थकारिका ॥३३॥
एवमेतत्तु चास्माभिः कर्तव्यं भर्तृणा सह ।
एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः ॥३४॥
ध्यानं हित्वा मायया तु प्रोवाच कालिकां प्रति ।
कालि ! कालि ! रुण्डमाले ! प्रिये ! भैरववादिनि ॥३५॥
शिवारूपधरे ! क्रूरे ! घोरदंष्ट्रे ! भयानके ! ।
त्रैलोक्यसुन्दरकरी-सुन्दर्यः सन्ति मेऽग्रतः ॥३६॥
सुन्दरीवीक्षणं कर्म कुरु कालि ! प्रिये ! शिवे ! ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्यानं मुञ्च महादेवि ! ता गच्छन्ति गृहं प्रति ॥३७॥
तव रूपं महाकालि ! महाकालप्रियंकरम् ।
एतासां सुन्दरं रूपं त्रैलोक्यप्रियकारकम् ॥३८॥
एवं मायाप्रभाविष्टो महाकालो वदन्निति ।
इति कालवचः श्रुत्वा कालं प्राह च कालिका ॥३९॥
मायया ऽऽच्छाद्य चात्मानं निजस्त्रीरूपधारिणी !
इतः प्रभृति स्त्रीभावं गमिष्यति युगे युगे ॥४०॥
वल्ल्याद्योषधयो देवि ! दिवा वल्लीस्वरूपताम् ।
रात्रौ स्त्रीरूपतामाद्य रतिकेलिः परस्परम् ॥ ४१ ॥
अज्ञानं चैव सर्वेषां भविष्यति युगे युगे ।
एवं शापं च दत्त्वा तु पुनः प्रोवाच कालिका ॥४२॥
विपरीतरतिं कृत्वा चिन्तयन्ति मनन्ति ये ।
तेषां वरं प्रदास्यामि नित्यं तत्र वसाम्यहम् ॥४३॥
इत्युक्त्वा कालिका देवी तत्रैवान्तरधीयत ।
त्रिंशत्-त्रिखर्व-षडबुन्द-नवत्यर्बुद-कोटयः ॥४४॥
दर्शनार्थं तपस्तेपे सा वै कुत्र गता प्रिया ! ।
मम प्राणप्रिया देवी हाहा प्राणप्रिये ! शिवे ! ॥४५॥
किं करोमि ? क्व गच्छामि ? इत्येवं भ्रमसङ्कुलः ।
तस्याः कालया दया जाता मम चिन्तापरः शिवः ॥४६॥
यन्त्रप्रस्तारबुद्धिस्तु कालया दत्तातिसत्वरम् ।
यन्त्रयागं तदारभ्य पूर्वं विन्दुत्तगोचरम् ॥४७॥
श्रीचक्रं यन्त्रप्रस्तार-रचनाभ्यासतत्परः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इतस्ततो भ्राम्यमाणस्त्रैलोक्यं चक्रमध्यकम् ॥४८॥
चक्रपारं दर्शनार्थं कोटयर्बुदयुगं गतम् ।
भक्तप्राणप्रिया देवी महाश्रीचक्रनायिका ॥४९॥
तत्र बिन्दौ परं रूपं सुन्दरं सुमनोहरम् ।
रूपं जातं महेशानि ! जाग्रत्त्रिपुरसुन्दरि ! ॥५०॥
रूपं दृष्ट्वा महादेवो राजराजेश्वरोऽभवत् ।
तस्याः कटाक्षमात्रेण तस्या रूपधरः शिवः ॥५१॥
विना शृङ्गारसंयुक्ता तदा जाता महेश्वरी ।
विना कालयंशतो देवि ! जगत्-स्थावर-जङ्गमम् ॥५२॥
न शृङ्गारो न शक्तित्वं क्वापि नास्ति महेश्वरी ।
सुन्दर्यर्था प्रार्थिता काली तुष्टा प्रोवाच कालिका ॥५३॥
सर्वासां नेत्र-केशे च ममांशोऽत्र भविष्यति ।
पूर्वावस्थासु देवेशि ! ममांशस्तिष्ठति प्रिय ! ॥५४॥
माऽवस्था तरुणाख्या तु तदन्ते नैव तिष्ठति ।
मद्भक्तानां महेशानि ! मदा तिष्ठति निश्चितम् ॥५५॥
शक्तिस्तु कुण्ठिता जाता तथा रूपं न सुन्दरम् ।
चिन्ताविष्टा तु मलिना जाता तत्र तु सुन्दरी ॥५६॥
क्षणं स्थित्वा ध्यानपरा काली चिन्तनतत्परा ।
तदा काली प्रसन्नाऽभूत् क्षणार्धेन महेश्वरी ॥५७॥
वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीति सादरम् ।

सुन्दर्युवाच—

मम सिद्धिवरं देहि वरोऽयं प्रार्थ्यते मया ॥५८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तादृगुपायं कथय येन शक्तिर्भविष्यति ।

श्रीकाल्युवाच—

मम नामसहस्रं च मया पूर्वं विनिर्मितम् ॥५९॥
मत्स्वरूपं ककाराख्यं महासाम्राज्यनामकम् ।
वरदानाभिधं नाम क्षणार्द्धाद्वरदायकम् ॥६०॥
तत्पठस्व महाभाग ! तव शक्तिर्भविष्यति ।
ततः प्रभृति श्रीविद्या तन्नामपाठतत्परा ॥६१॥
तदेव नामसाहस्रं सुन्दरी-शक्तिदायकम् ।
कथ्यते नाम साहस्रं सावधानमनाः शृणु ॥६२॥
सर्वसाम्राज्यमेधाख्य—नामसाहस्रकस्य च ।
महाकाल ऋषिः प्रोक्त उष्णिक्छन्दः प्रकीर्तितम् ॥६३॥
देवता दक्षिणा काली मायाबीजं प्रकीर्तितम् ।
हूँशक्तिः कालिकाबीजं कीलकं परिकीर्तितम् ॥६४॥
ध्यानं च पूर्ववत् कृत्वा साधय स्वेष्टसाधनम् ।
कालिका वरदानादि-स्वेष्टार्थे विनियोगतः ॥६५॥
कीलकेन षडङ्गानि षड्दीर्घाङ्गेन कारयेत् ।
ओमस्य श्रीसर्वसाम्राज्यमेधानाम कालीरूप-ककारात्मकसहस्रनामस्तोत्रमन्त्रस्य महाकाल ऋषिरनुष्टुप् छन्दः, श्रीदक्षिणमहाकाली देवता, ह्रीं बीजम्, हूँ शक्तिः, क्रीं कीलकं, कालीवरदानाद्यखिलेष्टार्थे जपे विनियोगः ।

ॐ क्रीं काली क्रूं कराली च कल्याणी कमला कला ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलावती कलाढ्या च कलापूज्या कलात्मिका ॥१॥
कलादृष्टा कलाप्रुष्टा कलामस्ता कलाधरा ।
कलाकोटिसमाभासा कलाकोटिप्रपूजिता ॥ २ ॥
कलाकर्मकलाधारा कलापारा कलागमा ।
कलाधारा कमलिनी ककारा करुणा कविः ॥ ३ ॥
ककारवर्णसर्वाङ्गी कलाकोटिप्रभूषिता ।
ककारकोटिगुणिता ककारकोटिभूषणा ॥ ४ ॥
ककारवर्णहृदया ककारमनुमण्डिता ।
ककारवर्णनिलया काकशब्दपरायणा ॥ ५ ॥
ककारवर्णमुकुटा ककारवर्णभूषणा ।
ककारवर्णरूपा च ककशब्दपरायणा ॥ ६ ॥
ककवीरास्फालरता कमलाकरपूजिता ।
कमलाकरनाथा च कमलाकररूपधृक् ॥ ७ ॥
कमलाकरसिद्धिस्था कमलाकरपारदा ।
कमलाकरमध्यस्था कमलाकरतोषिता ॥ ८ ॥
कथङ्कारपरालापा कथङ्कारपरायणा ।
कथङ्कारपदान्तस्था कथंकारपदार्थभूः ॥ ९ ॥
कमलाक्षी कमलजा कमलाक्षप्रपूजिता ।
कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा ॥१०॥
करतारा करच्छिन्ना करश्यामा कराणवा ।
करपूज्या कररता करदा करपूजिता ॥११॥
करतोया करामर्षा कर्मनाशा करप्रिया ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करप्राणा करकजा करका करकान्तरा ॥१२॥
करकाचलरूपा च करकाचलशोभिनी ।
करकाचलपुत्री च करकाचलतोषिता ॥१३॥
करकाचलगेहस्था करकाचलरक्षिणी ।
करकाचलसम्मान्या करकाचलकारिणी ॥१४॥
करकाचलवर्षाढ्या करकाचलरञ्जिता ।
करकाचलकान्तारा करकाचलमालनी ॥१५॥
करकाचलभोज्या च करकाचलरूपिणी ।
करामलकसंस्था च करामलकसिद्धिदा ॥१६॥
करामलकसम्पूज्या करामलकतारिणी ।
करामलककाली च करामलकरोचिनी ॥१७॥
करामलकमाता च करामलकसेविनी ।
करामलकवद्ध्येया करामलकदायिनी ॥१८॥
कञ्जनेत्रा कञ्जगतिः कञ्जस्था कञ्जधारिणी ।
कञ्जमालाप्रियकरी कञ्जरूपा च कञ्जना ॥१९॥
कञ्जजातिः कञ्जगतिः कञ्जहोमपरायणा ।
कञ्जमण्डलमध्यस्था कञ्जाभरणभूषिता ॥२०॥
कञ्जसम्माननिरता कञ्जोत्पत्तिपरायणा ।
कञ्जराशिसमाकारा कञ्जारण्यनिवासिनी ॥२१॥
करञ्जवृक्षमध्यस्था करञ्जवृक्षवासिनी ।
करञ्जफलभूषाढ्या करञ्जारण्यवासिनी ॥२२॥
करञ्जमालाभरणा करवालपरायणा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करवालप्रहृष्टात्मा करवालप्रियागतिः ॥२३॥
करवालप्रियाकन्था करवालविहारिणी ।
करवालमयीकर्मा करवालप्रियङ्करी ॥२४॥
कबन्धमालाभरणा कबन्धराशिमध्यगा ।
कबन्धकूटसंस्थाना कबन्धानन्तभूषणा ॥२५॥
कबन्धनादसन्तुष्टा कबन्धासनधारिणी ।
कबन्धगृहमध्यस्था कबन्धवनवासिनी ॥२६॥
कबन्धकाञ्चीकरणी कबन्धराशिभूषणा ।
कबन्धमालाजयदा कबन्धदेहवासिनी ॥२७॥
कबन्धासनमान्या च कपालमाल्यधारिणी ।
कपालमालामध्यस्था कपालव्रततोषिता ॥२८॥
कपालदीपसन्तुष्टा कपालदीपरूपिणी ।
कपालदीपवरदा कपालकज्जलस्थिता ॥२९॥
कपालमालाजयदा कपालजपतोषिणी ।
कपालसिद्धिसंहृष्टा कपालभोजनोद्यता ॥३०॥
कपालव्रतसंस्थाना कपालकमलालया ।
कवित्वामृतसारा च कवित्वामृतसागरा ॥३१॥
कवित्वसिद्धिसंहृष्टा कवित्वादानकारिणी ।
कविपूज्या कविगतिः कविरूपा कविप्रिया ॥३२॥
कविब्रह्मानन्दरूपा कवित्वव्रततोषिता ।
कविमानससंस्थाना कविवाञ्छाप्रपूरिणी ॥३३॥
कविकण्ठस्थिता कंहींकंकंकंकविपूर्तिदा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कज्जला कज्जलादानमानसा कज्जलप्रिया ॥३४॥
कपालकज्जलसमा कज्जलेशप्रपूजिता ।
कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी ॥३५॥
कज्जलप्रियसन्तुष्टा कज्जलप्रियतोषिणी ।
कपालमालाभरणा कपालकरभूषणा ॥३६॥
कपालकरभूषाढ्या कपालचक्रमण्डिता ।
कपालकोटिनिलया कपालदुर्गकारिणी ॥३७॥
कपालगिरिसंस्थाना कपालचक्रवासिनी ।
कपालपात्रसन्तुष्टा कपालार्घ्यपरायणा ॥३८॥
कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा ।
कपालचक्ररूपा च कपालरूपमात्रगा ॥३९॥
कदली कदलीरूपा कदलीवनवासिनी ।
कदलीपुष्पसम्प्रीता कदलीफलमानसा ॥४०॥
कदलीहोमसन्तुष्टा कदलीदर्शनोद्यता ।
कदलीगर्भमध्यस्था कदलीवनसुन्दरी ॥४१॥
कदम्बपुष्पनिलया कदम्बवनमध्यगा ।
कदम्बकुसुमामोदा कदम्बवनतोषिणी ॥४२॥
कदम्बपुष्पसम्पूज्या कदम्बपुष्पहोमदा ।
कदम्बपुष्पमध्यस्था कदम्बफलभोजिनी ॥४३॥
कदम्बकाननान्तःस्था कदम्बाचलवासिनी ।
कक्षपा कक्षपाराध्या कक्षपासनसंस्थिता ॥४४॥
कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलप्रीता कलहदा कलहा कलहातुरा ॥४५॥
कर्ण्णयक्षी कर्ण्णवार्त्ता कथिनी कर्ण्णसुन्दरी ।
कर्ण्णपिशाचिनी कर्ण्णमञ्जरी कपिकक्षदा ॥४६॥
कविकक्षाविरूपाढ्या कविकक्षस्वरूपिणी ।
कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी ॥४७॥
कस्तूरीमृगसन्तोषा कस्तूरीमृगमध्यगा ।
कस्तूरीरसनीलाङ्गी कस्तूरीगन्धतोषिता ॥४८॥
कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया ।
कस्तूरीप्रेमसन्तुष्टा कस्तूरीप्राणधारिणी ॥४९॥
कस्तूरीपूजकानन्दा कस्तूरीगन्धरूपिणी ।
कस्तूरीमालिकारूपा कस्तूरीभोजनप्रिया ॥५०॥
कस्तूरीतिलकानन्दा कस्तूरीतिलकप्रिया ।
कस्तूरीहोमसन्तुष्टा कस्तूरीतर्पणोद्यता ॥५१॥
कस्तूरीमार्ज्जनोद्युक्ता कस्तूरीचक्रपूजिता ।
कस्तूरीपुष्पसम्पूज्या कस्तूरीचर्वणोद्यता ॥५२॥
कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी ।
कस्तूरिकामोदरता कस्तूरीवनवासिनी ॥५३॥
कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी ।
कस्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा ॥५४॥
कस्तूरीकुण्डसंस्नाता कस्तूरीकुण्डमज्जना ।
कस्तूरीजीवसन्तुष्टा कस्तूरीजीवधारिणी ॥५५॥
कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कस्तूरीजातिभावस्था कस्तूरीगन्धचुम्बना ॥५६॥
कस्तूरीगन्धसंशोभा-विराजित-कपालभूः ।
कस्तूरीमदनान्तःस्था कस्तूरीमदहर्षदा ॥५७॥
कस्तूरीकविताढ्या च कस्तूरीगृहमध्यगा ।
कस्तूरीस्पर्शकप्राणा कस्तूरीविन्दकान्तका ॥५८॥
कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता ।
कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥५९॥
कस्तूरीस्थापनाशक्ता कस्तूरीस्थानरञ्जिनी ।
कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता ॥६०॥
कस्तूरीवन्दकाराध्या कस्तूरीस्थानवासिनी ।
कहरूपा कहाढ्या च कहानन्दा कहात्मभूः ॥६१॥
कहपूज्या कहाख्या च कहहेया कहात्मिका ।
कहमालाकण्ठभूषा कहमन्त्रजपोद्यता ॥६२॥
कहनामस्मृतिपरा कहनामपरायणा ।
कहपरायणरता कहदेवी कहेश्वरी ॥६३॥
कहहेतु कहानन्दा कहनादपरायणा ।
कहमाता कहान्तस्था कहमन्त्रा कहेश्वरा ॥६४॥
कहगेया कहाराध्या कहध्यानपरायणा ।
कहतन्त्रा कहकहा कहचर्य्यापरायणा ॥ ६५ ॥
कहाचारा कहगतिः कहताण्डवकारिणी ।
कहारण्या कहगतिः कहशक्तिपरायणा ॥६६॥
कहराज्यनता कर्म्मसाक्षिणी कर्म्मसुन्दरी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्म्मविद्या कर्म्मगतिः कर्म्मतन्त्रपरायणा ॥६७॥
कर्म्ममात्रा कर्म्मगात्रा कर्म्मधर्म्मपरायणा ।
कर्म्मरेखानाशकर्त्री कर्म्मरेखाविनोदिनी ॥६८॥
कर्म्मरेखामोहकारी कर्म्मकीर्त्तिपरायणा ।
कर्म्मविद्या कर्म्मसारा कर्म्मधारा च कर्म्मभूः ॥६९॥
कर्म्मकारी कर्म्महारी कर्म्मकौतुकसुन्दरी ।
कर्म्मकाली कर्म्मतारा कर्म्मच्छिन्ना च कर्म्मदा ॥७०॥
कर्म्मचाण्ड लिनी कर्म्मवेदमाता च कर्म्मभूः ।
कर्म्मकाण्डरतानन्ता कर्म्मकाण्डानुमानिता ॥७१॥
कर्म्मकाण्डपरीणाहा कमठी कमठाकृतिः ।
कमठाराध्यहृदया कमठकण्ठसुन्दरी ॥७२॥
कमठासनसंसेव्या कमठीकर्मतत्परा ।
करुणाकरकान्ता च करुणाकरवन्दिता ॥७३॥
कठोरा करमाला च कठोरकुचधारिणी ।
कपर्दिनी कपटिनी कठिनी कङ्कभूषणा ॥७४॥
करभोरूः कठिनदा करभा करभालया ।
कलभाषामयी कल्पा कल्पना कल्पदायिनी ॥७५॥
कमलस्था कलामाला कमलास्या कणत्प्रभा ।
ककुद्मिनी कष्टवती करणीयकथार्चिता ॥७६॥
कचार्चिता कचतनुः कचसुन्दरधारिणी ।
कठोरकुचसंलग्ना कटिसूत्रविराजिता ॥७७॥
कर्णभक्ष-प्रिया कन्दाकथा कन्दगतिः कलिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलिघ्नी कलिदूती च कविनायक-पूजिता ॥७८॥
कणकक्षानियन्त्री च कश्चित्कविवरार्चिता ।
कर्त्री च कर्त्रिकाभूषा करिणी कर्णशत्रुघा ॥७९॥
करणेशी करणपा कलवाचा कलानिधिः ।
कलना कलनाधारा कलनाकारिकाकरा ॥८०॥
कलगेया कर्कराशिः कर्कराशि-प्रपूजिता ।
कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी ॥८१॥
कन्यकादानसन्तुष्टा कन्यकादानतोषिणी ।
कन्यादानकरानन्दा कन्यादानग्रहेष्टदा ॥८२॥
कर्षणाकक्षदहना कामिता कमलासना ।
करमालानन्दकर्त्री करमालाग्रपोषिता ॥८३॥
करमालाशयानन्दा करमालासमागमा ।
करमालासिद्धिदात्री करमालाकरप्रिया ॥८४॥
करप्रिया कररता करदानपरायणा ।
कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः ॥८५॥
कलनादनिनादस्था कलनादवरप्रदा ।
कलनादसमाजस्था कहोला च कहोलदा ॥८६॥
कहोलगेहमध्यस्था कहोलवरदायिनी ।
कहोलकविताधारा कहोलऋषिमानिता ॥८७॥
कहोलमानसाराध्या कहोलवाक्यकारिणी ।
कर्त्रीरूपा कर्त्रीमयी कर्त्रीमाता च कर्त्तरी ॥८८॥
कनीया कनकाराध्या कनीनकमयी तथा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कनीयानन्दनिलया कनकानन्दतोषिता ॥८९॥
कनीयककराकाष्ठा कथार्णवकरी करी ।
करिगम्या करिगतिः करिध्वजपरायणा ॥९०॥
करिनाथप्रियाकण्ठा कथानकप्रतोषिता ।
कमनीया कमनका कमनीयविभूषणा ॥९१॥
कमनीयसमाजस्था कमनीयव्रतप्रिया ।
कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥९२॥
कपिलाराध्यहृदया कपिलाप्रियवादिनी ।
कहचक्रमन्त्रवर्णा कहचक्रप्रसूनका ॥९३॥
कएईलह्रींस्वरूपा च कएईलह्रींवरप्रदा ।
कएईलह्रींसिद्धिदात्री कएईलह्रींस्वरूपिणी ॥९४॥
कएईलह्रींमन्त्रवर्णा कएईलह्रींप्रसूकला ।
कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा ॥९५॥
कङ्काली च कपाली च कङ्कालप्रियभाषिणी ।
कङ्कालभैरवाराध्या कङ्कालमानसस्थिता ॥९६॥
कङ्कालमोहनिरता कङ्कालमोहदायिनी ।
कलुपघ्नी कलुपहा कलुषार्त्तिविनाशिनी ॥९७॥
कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता ।
कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा ॥९८॥
कलेवरकरीकाश्वी कवर्गा च करालका ।
करालभैरवाराध्या करालभैरवेश्वरी ॥९९॥
कराला कलनाधारा कपर्दीशवरप्रदा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कपर्दीशप्रेमलता कपर्दिमालिकायुता ॥१००॥
कपर्दिजयमालाढ्या करवीरप्रसूनदा ।
करवीरप्रियप्राणा करवीरप्रपूजिता ॥१०१॥
कर्णिकारसमाकारा कर्णिकारप्रपूजिता ।
करिषाग्निस्थिता कर्षा कर्षमात्रसुवर्णदा ॥१०२॥
कलशा कलशाराध्या कषाया करिगानदा ।
कपिला कलकण्ठी च कलिकल्पलता मता ॥१०३॥
कल्पलता कल्पमाता कल्पकारी च कल्पभूः ।
कर्पूरामोदरुचिरा कर्पूरामोदधारिणी ॥१०४॥
कर्पूरमालाभरणा कर्पूरवासपूर्त्तिदा ।
कर्पूरमालाजयदा कर्पूरार्णवमध्यगा ॥१०५॥
कर्पूरतर्पणरता कटकाम्बरधारिणी ।
कपटेश्वरसम्पूज्या कपटेश्वररूपिणी ॥१०६॥
कटुःकविध्वजाराध्या कलापपुष्पधारिणी ।
कलापपुष्परुचिरा कलापपुष्पपूजिता ॥१०७॥
ककचा ककचाराध्या कथम्भ्रूमा करालता ।
कथङ्कारविनिर्मुक्ता काली कालक्रियाकतुः ॥१०८॥
कामिनी कामिनीपूज्या कामिनीपुष्पधारिणी ।
कामिनीपुष्पनिलया कामिनीपुष्पपूर्णिमा ॥१०९॥
कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा ।
कामिनीपुष्पतिलका कामिनीकुण्डचुम्बना ॥११०॥
कामिनीयोगसन्तुष्टा कामिनीयोगभोगदा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामिनीकुण्डमम्मग्ना कामिनीकुण्डमध्यगा ॥१११॥
कामिनीमानसाराध्या कामिनीमानतोषिता ।
कामिनीमानसञ्चारा कालिका कालकालिका ॥११२॥
कामा च कामदेवी च कामेशी कामसम्भवा ।
कामभावा कामरता कामार्त्ता कामझरी ॥११३॥
काममञ्जीररणिता कामदेवप्रियान्तरा ।
कामकाली कामकला कालिका कमलार्चिता ॥११४॥
कादिका कमला काली कालानलसमप्रभा ।
कल्पान्तदहना कान्ता कान्तारप्रियवासिनी ॥११५॥
कालपूज्या कालरता कालमाता च कालिनी ।
कालवीरा कालघोरा कालसिद्धा च कालदा ॥११६॥
कालाञ्जनसमाकारा कालञ्जरनिवासिनी ।
कालऋद्धिः कालवृद्धिः कारागृहविमोचिनी ॥११७॥
कादिविद्या कादिमाता कादिस्था कादिसुन्दरी ।
काशी काश्वी च काश्वीशा काशीशवरदायिनी ॥११८॥
क्रीम्बीजा चैव क्राम्बीजाहृदयायनमस्स्मृता ।
काम्या काम्यगतिः काम्यसिद्धिदात्री च कामभूः ॥११९॥
कामाख्या कामरूपा च कामचापविमोचिनी ।
कामदेवकलारामा कामदेवकलालया ॥१२०॥
कामरात्रिः कामदात्री कान्ताराचलवासिनी ।
कामरूपा कालगतिः कामयोगपरायणा ॥१२१॥
कामसम्मर्दनरता कामगेहविकाशिनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालभैरवभार्य्या च कालभैरवकामिनी ॥१२२॥
कालभैरवयोगस्था कालभैरवयोगदा ।
कामधेनुः कामदोग्ध्री कामदात्री च कान्तिदा ॥१२३॥
कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी ।
कार्त्तवीर्य्या कार्त्तिकेया कार्त्तिकेयप्रपूजिता ॥१२४॥
कार्य्या कारणदा कार्य्यकारिणी कारणान्तरा ।
कान्तिगम्या कान्तिमयी कात्या कात्यायनी च का ॥१२५॥
कामसारा च काश्मीरा काश्मीराचारतत्परा ।
कामरूपाचाररता कामरूपप्रियम्बदा ॥१२६॥
कामरूपाचारसिद्धिः कामरूपमनोमयी ।
कार्त्तिकी कार्त्तिकाराध्या काञ्चनारप्रसूनभृः ॥१२७॥
काञ्चनारप्रसूनाभा काञ्चनारप्रपूजिता ।
काञ्चरूपा काञ्चभूमिः कांस्यपात्रप्रभाजिनी ॥१२८॥
कांस्यध्वनिमयी काम-सुन्दरी कामचुम्बना ।
काशपुष्पप्रतीकाशा कामद्रुमसमागमा ॥१२९॥
कामपुष्पा कामभूमिः कामपूज्या च कामदा ।
कामदेहा कामगेहा कामबीजपरायणा ॥१३०॥
कामध्वजसमारूढा कामध्वजसमास्थिता ।
काश्यपी काश्यपाराध्या काश्यपानन्ददायिनी ॥१३१॥
कालिन्दीजलसङ्काशा कालिन्दीजलपूजिता ।
कादेवपूजानिरता कादेवपरमार्थदा ॥१३२॥
कार्म्मणा कार्म्मणाकारा कामकार्म्मणकारिणी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्म्मणत्रोटनकरी काकिनी कारणाह्वया ॥१३३॥
काव्यामृता च कालिङ्गा कालिङ्गमर्द्दनोद्यता ।
कालागुरुविभूषाढ्या कालागुरुविभूतिदा ॥१३४॥
कालागुरुसुगन्धा च कालागुरुप्रतर्पणा ।
कावेरीनीरसम्प्रीता कावेरीतीरवासिनी ॥१३५॥
कालचक्रभ्रमाकारा कालचक्रनिवासिनी ।
कानना काननाधारा कारुः कारुणिकामया ॥१३६॥
काम्पिल्यवासिनी काष्ठा कामपत्नी च कामभूः ।
कादम्बरीपानरता तथा कादम्बरीकला ॥१३७॥
कामवन्द्या च कामेशी कामराजप्रपूजिता ।
कामराजेश्वरीविद्या कामकौतुकसुन्दरी ॥१३८॥
काम्बोजजा काञ्चिनदा कांस्यकाञ्चनकारिणी ।
काञ्चनाद्रिसमाकारा काञ्चनाद्रिप्रदानदा ॥१३९॥
कामकोटिः कामकेशी कारिका कान्तराश्रया ।
कामभेदी च कामार्ति-नाशिनी कामभूमिका ॥१४०॥
कालनिर्णाशिनी कव्यवनिता कामरूपिणी ।
कायस्था कामसन्दीप्तिः काव्यदा कालसुन्दरी ॥१४१॥
कामेशी कारणवरा कामेशीपूजनोद्यता ।
काश्मी-नूपृग्भूषाढ्या कुङ्कुमाभरणान्विता ॥१४२॥
कालचक्रा कालगतिः कालचक्रमनोभवा ।
कुन्दमध्या कुन्दपुष्पा कुन्दपुष्पप्रिया कुजा ॥१४३॥
कुजमाता कुजाराध्या कुठारवरधारिणी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुञ्जरस्था कुशरता कुशेशयविलोचना ॥१४४॥
कुनटी कुरुरी कुद्रा कुरङ्गी कुटजाश्रया ।
कुम्भीनस-विभूषा च कुम्भीनस-वधोद्यता ॥१४५॥
कुम्भकर्णमनोल्लासा कुलचूडामणिः कुला ।
कुलालगृहकन्या च कुलचूडामणिप्रिया ॥१४६॥
कुलपूज्या कुलाराध्या कुलपूजापरायणा ।
कुलभूषा तथा कुक्षिः कुररीगणसेविता ॥१४७॥
कुलपुष्पा कुलरता कुलपुष्पपरायणा ।
कुलवस्त्रा कुलाराध्या कुलकुण्डसमप्रभा ॥१४८॥
कुलकुण्डसमोल्लासा कुण्डपुष्पपरायणा ।
कुण्डपुष्पाप्रसन्नास्या कुण्डगोलोद्भवात्मिका ॥१४९॥
कुण्डगोलोद्भवाधारा कुण्डगोलमयी कुहूः ।
कुण्डगोलप्रियप्राणा कुण्डगोलप्रपूजिता ॥१५०॥
कुण्डगोलमनोल्लासा कुण्डगोलबलप्रदा ।
कुण्डदेवरता कुब्जा कुलसिद्धिकरापरा ॥१५१॥
कुलकुण्डसमाकारा कुलकुण्डसमानभूः ।
कुण्डसिद्धिः कुण्डऋद्धिः कुमारीपूजनोद्यता ॥१५२॥
कुमारीपूजकप्राणा कुमारीपूजकालया ।
कुमारीकामसन्तुष्टा कुमारीपूजकोत्सुका ॥१५३॥
कुमारीव्रतसन्तुष्टा कुमारीरूपधारिणी ।
कुमारीभोजनप्रीता कुमारी च कुमारदा ॥१५४॥
कुमारमाता कुलदा कुलयोनिः कुलेश्वरी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुललिङ्गा कुलानन्दा कुलरम्या कुतर्कघृक् ॥१५५॥
कुन्तो च कुलकान्ता च कुलमार्गपरायणा ।
कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा ॥१५६॥
कुलिशाङ्गी कुब्जिका च कुब्जिकानन्दवर्द्धिनी ।
कुलीना कुञ्जरगतिः कुञ्जरेश्वरगामिनी ॥१५७॥
कुलपाली कुलवती तथैव कुलदीपिका ।
कुलयागेश्वरी कुण्डा कुङ्कुमारुणविग्रहा ॥१५८॥
कुङ्कुमानन्दसन्तोषा कुङ्कुमाणववासिनी ।
कुहुमा कुसुमप्रीता कुलभूः कुलसुन्दरी ॥१५९॥
कुमुद्वती कुमुदिनी कुशला कुलटालया ।
कुलटालयसव्यस्था कुलटासङ्गतोषिता ॥१६०॥
कुलटाभवनोद्युक्ता कुशावर्त्ता कुलार्णवा ।
कुलार्णवाचाररता कुण्डली कुण्डलाकृतिः ॥१६१॥
कुपती च कुलश्रेष्ठा कुलचक्रपरायणा ।
कूटस्था कूटदृष्टिश्च कुन्तला कुन्तलाकृतिः ॥१६२॥
कूर्चलाकृतिरूपा च कूर्च्चबीजधरा च कूः ।
कूंकूंकूंकूंशब्दरता क्रूंक्रूंक्रूंक्रूम्परायणा ॥१६३॥
कूंकूंकूंशब्दनिलया कूकुरालयवासिनी ।
कूकूरासङ्गसंयुक्ता कूकूरानन्तविग्रहा ॥१६४॥
कूर्चारम्भा कूर्च्चबीजा कूर्च्चजापपरायणा ।
कूर्चस्पर्शनसन्तुष्टा कूर्चालिङ्गनहर्षदा ॥१६५॥
कुमतिघ्नी कुवेरार्च्या कुचभूः कुलनायिका ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुगायना कुचधरा कुमाता कुन्ददन्तिनी ॥१६६॥
कुगेया कुहराभाषा कुगेया कुघ्नदारिमा ।
कीर्त्तिः किरातिनी किलन्ना किन्नरा किन्नरी क्रिया ॥१६७॥
क्रीङ्कारा क्रीञ्जपासक्ता क्रींहूंस्त्रींमन्त्ररूपिणी ।
किर्म्मीरितदृशापाङ्गी किशोरी च किरीटिनी ॥१६८॥
कीटभाषा कीटयोनिः कीटमाता च कीटदा ।
किंशुका कीरभाषा च क्रियासारा क्रियावती ॥१६९॥
कींकींशब्दपरा क्लींक्लींक्लंक्लूंक्लैंक्लौंमन्त्ररूपिणी ।
कांकींकंकैंस्वरूपा च कः फट्मन्त्रस्वरूपिणी ॥१७०॥
केतकीभूषणानन्दा केतकीभरणान्विता ।
कैकदा केशिनी केशी केशीसूदनतत्परा ॥१७१॥
केशरूपा केशशुक्ता कैकेयी कौशिकी तथा ।
कैरवा कैरवाह्लादा केशरा केतुरूपिणी ॥१७२॥
केशवाराध्यहृदया केशवासक्तमानसा ।
क्लेव्यविनाशिनी क्लैंश्च क्लैंबीजजपतोषिता ॥१७३॥
कौशल्या कोशलाक्षी च कोशा च कमला तथा ।
कोलापुरनिवासा च कोलासुरविनाशिनी ॥१७४॥
कोटिरूपा कोटिरता क्रोधिनी क्रोधरूपिणी ।
केका च कोकिला कोटिः कोटिमन्त्रपरायणा ॥१७५॥
कोट्यनन्तमन्त्रयुता कैरूपा केरलाश्रया ।
केरलाचारनिपुणा केरलेन्द्रगृहस्थिता ॥१७६॥
केदाराश्रमसंस्था च केदारेश्वरपूजिता ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी ॥१७७॥
कोदण्डधारिणी क्रौञ्चा कौशिल्या कौलमार्गगा ।
कौलिनी कौलिकाराध्या कौलिकागारवासिनी ॥१७८॥
कौतुकी कौमुदी कौला कुमारी कौलपूजिता ।
कौण्डिन्या कौशिकी क्रोधाज्वालाभासुररूपिणी॥ १७९॥
कोटिकालानलज्वाला कोटिमार्त्तण्डविग्रहा ।
कृत्तिका कृष्णवर्णा च कृष्णकृत्या क्रियातुरा ॥१८०॥
कृशाङ्गी कृतकृत्या च क्रःफट्स्वाहास्वरूपिणी ।
क्रौंक्रौंहूंफट्मन्त्रवर्णा क्रींहींहूंफट्नमस्स्वधा ॥१८१॥
क्रींक्रींहींहीं तथा हूं हूं फट्स्वाहामन्त्ररूपिणी ।
इति श्रीमर्वसाम्राज्यमेधा-नामसहस्रकम् ॥१८२॥

[अथ फलश्रुतिकथनम् ।]

सुन्दरीशक्तिदानाख्यं स्वरूपाभिधमेव च ।
कथित दक्षिणाकाल्याः सुन्दर्य्यै प्रीतियोगतः ॥ १ ॥
वरदानप्रसङ्गेन रहस्यमपि दर्शितम् ।
गोपनीयं सदा भक्त्या पठनीयं परात्परम् ॥ २ ॥
प्रातर्मध्याह्नकाले च मध्यार्द्धरात्रयोरपि ।
यज्ञकाले जपान्ते च पठनीयं विशेषतः ॥ ३ ॥
यः पठेत् साधको धीरः कालीरूपो हि वर्षतः ।
पठेद्वा पाठयेद्वाऽपि शृणोति श्रावयेदपि ॥ ४ ॥
वाचकं तोषयेद्वापि स भवेत् कालिकातनुः ।
स-हेलं वा स-लीलं वा यश्चैनं मानवः पठेत् ॥ ५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वदुःखविनिर्मुक्तस्त्रैलोक्यविजयी कविः ।
मृतवन्ध्या काकवन्ध्या कन्यावन्ध्या च वन्ध्यका ॥ ६ ॥
पुष्पवन्ध्या शूलवन्ध्या शृणुयात् स्तोत्रमुत्तमम् ।
सर्वसिद्धिप्रदातारं सत्कविं चिरजीवितम् ॥ ७ ॥
पाण्डित्यं कीर्त्तिसंयुक्तं लभते नाऽत्र संशयः ।
यं यं काममुपस्कृत्य कालीं ध्यात्वा जपेत् स्तवम् ॥ ८ ॥
तं तं कामं करे कृत्वा मन्त्री भवति नाऽन्यथा ।
योनिपुष्पैर्लिङ्गपुष्पैः कुण्डगोलोद्भवैरपि ॥ ९ ॥
संयोगामृतपुष्पैश्च वस्त्रदेवीप्रसूनकैः ।
कालिपुष्पै पीठतोयैर्यो निक्षालनतोयकैः ॥१०॥
कस्तूरीकुङ्कुमैर्देवीं नखकालागुरुक्रमात् ।
अष्टगन्धै-र्धूप-दीपै-र्यवयावयसंयुतैः ॥११॥
रक्तचन्दनासन्दूरैर्मत्स्यमांसादिभूषणैः ।
मधुभिः पायसैः क्षीरैः शोधितैः शोणितैरपि ॥१२॥
महोपचारै रक्तैश्च नैवेद्यैः सु-रसान्वितैः ।
पूजयित्वा महाकालीं महाकालेन लालिताम् ॥१३॥
विद्याराज्ञीं कुल्लुकाञ्च जप्त्वा स्तोत्रं जपेच्छिवे !
काली भक्तस्त्वेकचित्तः सिन्दूरतिलकान्वितः ॥१४॥
ताम्बूलपूरितमुखो मुक्तकेशो दिगम्बरः ।
शवयोनिस्थितो वीरः श्मशानसुरतान्वितः ॥१५॥
शून्यालये बिन्दुपीठे पुष्पाकीर्णे शिवावने ।
शयनोत्थप्रभुञ्जानः कालीदर्शनमाप्नुयात् ॥१६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र यद्यत् कृतं कर्म तदनन्तफलं भवेत् ।
ऐश्वर्य्ये कमला साक्षात् सिद्धौ श्रीकालिकाम्बिका ॥१७॥
कवित्वे तारिणीतुल्यः सौन्दर्ये सुन्दरीसमः ।
सिन्धोर्द्वारासमः काय्यें श्रुतौ श्रुतिधरस्तथा ॥१८॥
वज्रास्त्र इव दुर्द्धर्षस्त्रैलोक्यविजयाक्षभृत् ।
शत्रुहन्ता काव्यकर्त्ता भवेच्छिवसमः कलौ ॥१९॥
दिग्-विदिक् चन्द्रकर्त्ता च दिवारात्रिविपर्य्ययी ।
महादेवसमो योगी त्रैलोक्यस्तम्भकः क्षणात् ॥२०॥
गानेन तुम्बुरुः साक्षाद् दाने कर्णसमो भवेत् ।
गजाऽश्व-रथ-पत्तीनामस्त्राणामधिपः कृती ॥२१॥
आयुष्येषु शुशुण्डी च जरापलितनाशकः ।
वर्षषोडशवान् भूयात् सर्वकाले महेश्वरी ॥२२॥
ब्रह्माण्डगोले देवेशि ! न तस्य दुर्लभं क्वचित् ।
सर्वं हस्तगतं भूयान्नात्र काय्यां विचारणा ॥२३॥
कुलपुष्पयुतं दृष्ट्वा तत्र कालीं विचिन्त्य च ।
विद्याराज्ञीं तु सम्पूज्य पठेन्नामसहस्रकम् ॥२४॥
मनोरथमयी सिद्धिस्तस्य हस्ते सदा भवेत् ।
परदारान् समालिङ्ग्य सम्पूज्य परमेश्वरीम् ॥२५॥
हस्ताहस्तिकयायोगं कृत्वा जप्त्वा स्तवं पठेत् ।
योनिं वीक्ष्य जपेत् स्तोत्रं कुबेरादधिको भवेत् ॥२६॥
कुण्डगोलोद्भवं गृह्यवर्णाक्तं होमयेन्निशि ।
पितृभूमौ महेशानि ! विधिरेखां प्रमार्ज्जयेत् ॥२७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तरुणीं सुन्दरीं रम्यां चञ्चलां कामगर्व्वितां ।
समानीय प्रयत्नेन संशोष्य न्यासयोगतः ॥२८॥
प्रसूनमञ्चं संस्थाप्य पृथिवीं कशितां चरेत् ।
मूलदक्रं तु सम्भाव्य देव्याश्चारणसँयुतम् ॥२९॥
सम्पूज्य परमेशानि सङ्कल्प्य तु महेश्वरि ! ।
जप्त्वा स्तुत्वा महेशानीं प्रणवं संस्मरेच्छिवे ! ॥३०॥
अष्टोत्तरशतंर्योनिं प्रमन्त्र्याचुम्ब्य यत्नतः ।
संयोगीभूय जप्तव्यं सर्वविद्याधिपो भवेत् ॥३१॥
शून्यागारे शिवारण्ये शिवदेवालये तथा ।
शून्यदेशे तडागे च गङ्गागर्भे चतुष्पथे ॥३२॥
श्मशाने पर्वतप्रान्ते एकलिङ्गे शिवाग्रुखे ।
मुण्डयोनौ ऋतौ स्नात्वा गेहे वेश्यागृहे तथा ॥३३॥
कुट्टिनीगृहमध्ये च कदलीमण्डपे तथा ।
पठेत् सहस्रनामाख्यं स्तोत्रं सर्वार्थसिद्धये ॥३४॥
अरण्ये शून्यगर्त्ते च रणे शत्रुसमागमे ।
प्रजपेच्च ततो नाम कालयाश्चैव सहस्रकम् ॥३५॥
बालानन्दपरो भूत्वा पठित्वा कालिकास्तवम् ।
कालीं सञ्चिन्त्य प्रजपेत् पठेन्नामसहस्रकम् ॥३६॥
सर्वसिद्धीश्वरो भूयाद्वाञ्छासिद्धीश्वरो भवेत् ।
मुण्डचूडकयोर्योनिं त्वचि वा कोमले शिवे ! ॥३७॥
विष्टरे शववस्त्रे वा पुष्पवस्त्रासनेऽपि वा ।
मुक्तकेशो दिशावासा मैथुनी शयने स्थितः ॥३८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जप्त्वा कालीं पठेत् स्तोत्रं खेचरीसिद्धिभाग् भवेत् ।
चिकुरं योगमासाद्य शुक्रोत्सारणमेव च ॥३९॥
जप्त्वा श्रीदक्षिणां कालीं शक्तिपातशतं भवेत् ।
लतां स्पृशन् जपित्वा च रमित्वा त्वर्च्चयन्नपि ॥४०॥
आलोकयन् दिशावासाः परशक्तिं विशेषतः ।
स्मृत्वा श्रीदक्षिणां कालीं योनिं स्वकरगां चरेत् ॥४१॥
पठेन्नामसहस्रं यः स शिवादधिको भवेत् ।
लतान्तरेषु जप्तव्यं स्तुत्वा कालीं निराकुलः ॥४२॥
दशावधानो भवति मासमात्रेण साधकः ।
कालरात्र्यां महारात्र्यां वीररात्र्यामपि प्रिये ! ॥४३॥
महारात्रौ चतुर्दश्यामष्टम्यां संक्रमेऽपि वा ।
कुहूपूर्णेन्दुशुक्रेषु भौमामायां निशामुखे ॥४४॥
नवम्यां मङ्गलदिने तथा कूलतिथौ शिव ! ।
कुलक्षेत्रे प्रयत्नेन पठेन्नामसहस्रकम् ॥४५॥
सौदर्शनो भवेदाशु किन्नरीसिद्धिभाग्भवेत् ।
पांश्वमाभिमुखं लिङ्गं वृषशून्यं पुरातनम् ॥४६॥
तत्र स्थित्वा जपेत् स्तोत्रं सर्वकामाप्तये शिवे ! ।
भौमवारे निशीथे वा अमावस्यादिने शुभे ॥४७॥
मापभक्तबलिं छागं कृसरान्नं च पायसम् ।
दध्यमीनं शोणितञ्च दधि दुग्धं गुडार्द्रकम् ॥४८॥
बलिं दत्वा जपेत् तत्र त्वष्टोत्तरसहस्रकम् ।
देव-गन्धर्व-सिद्धौघैः सेवितां सुरसुन्दरीम् ॥४९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लभेद्देवेशि ! मासेन तस्य चासनसंहतिः ।
हस्तत्रयं भवेदूर्ध्वं नात्र कार्या विचारणा ॥५०॥
हेलया लीलया भक्त्या कालीं स्तौति नरस्तु यः ।
ब्रह्मादींस्तम्भयेद्देवि ! माहेशीं मोहयेत् क्षणात् ॥५१॥
आकर्षयेन्महाविद्यां दशपूर्वान् त्रियामतः ।
कुर्वीत विष्णुनिर्म्माणं यमादीनां तु मारणम् ॥५२॥
ध्रुवमुच्चाटयेन्नूनं सृष्टिन्तनतां नरः ।
मेष-माहिष-मार्जार-खर-च्छाग-नरादिकैः ॥५३॥
खड्गी-शूकर-कापोतै-ष्टिट्टिभैः शशकैः पलैः ।
शोणितैः सास्थिमांसैश्च कारण्डैर्दुग्धपायसैः ॥५४॥
कादम्बरी-सिन्धु-मद्यैः सुरारिष्टैश्च सासवैः ।
योनिक्षालिततोयैश्च योनिलिङ्गामृतैरपि ॥५५॥
स्वजातकुसुमैः पूज्यां जपान्ते तर्प्पयेच्छिवाम् ।
सर्वसाम्राज्यनाम्ना तु स्तुत्वा नत्वा स्वशक्तितः ॥५६॥
शक्त्या लभन् पठेत् स्तोत्रं कालीरूपो दिनत्रयात् ।
दक्षिणाकालिका तस्य गेहे तिष्ठति नाऽन्यथा ॥५७॥
वेश्यालता गृहे गत्वा तस्याश्चुम्बनतत्परः ।
तस्या योनौ मुखं दत्वा तद्रसं विलिहन् जपेत् ॥५८॥
तदन्ते नाम साहस्रं पठेद्भक्तिपरायणः ।
कालिकादर्शनं तस्य भवेदेव त्रियामतः ॥५९॥
नृत्यपात्रगृहे गत्वा मकारपञ्चकान्वितः ।
प्रसूनमञ्चे संस्थाप्य शक्तिन्यासपरायणः ॥६०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पात्राणां साधनं कृत्वा दिग्वस्त्रान्तां समाचरेत् ।
सम्भाव्य चक्रं तन्मूले तत्र सावरणान् जपेत् ॥६१॥
शतं भाले शतं केशे शतं सिन्दूरमण्डले ।
शतत्रयं कुचद्वन्द्वे शतं नाभौ महेश्वरि ! ॥६२॥
शतं योनौ महेशानि ! संयोगे च शतत्रयम् ।
जपेत्तत्र महेशानि ! तदन्ते प्रपठेत् स्तवम् ॥६३॥
शतावधानो भवति मासमात्रेण साधकः ।
मातङ्गिनीं समानीय किं वा कापालिनीं शिवे ! ॥६४॥
दन्तमाला जपे कार्या गले धार्या नृमुण्डजा ।
नेत्रपद्मे योनिचक्रं शक्तिचक्रं स्ववक्त्रके ॥६५॥
कृत्वा जपेन्महेशानि मुण्डयन्त्रं प्रपूजयेत् ।
मुण्डासनस्थितो वीरो मकारपञ्चकान्वितः ॥६६॥
अन्यामालिङ्ग्य प्रजपेदन्यां सञ्चुम्ब्य वै पठेत् ।
अन्यां सम्पूजयेत्तत्र त्वन्यां सम्मर्द्दयञ्जपेत् ॥६७॥
अन्यायोनौ शिवं दत्त्वा पुनः पूर्ववदाचरेत् ।
अवधानसहस्रेषु शशिपातशतेषु च ॥६८॥
राजा भवति देवेशि ! मासपञ्चकयोगतः ।
यवनीशक्तिमानीय गानशक्तिपरायणाम् ॥६९॥
कुलाचारमतेनैव तस्या योनिं विकासयेत् ।
तत्र जिह्वां प्रदत्त्वा तु जपेन्नामसहस्रकम् ॥७०॥
नृकपाले तत्र दीपं ज्वालय यत्नेन वै जपेत् ।
महाकविवरो भूयान्नात्र कार्या विचारणा ॥७१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामार्तो शक्तिमानीय योनौ तु मूलचक्रकम् ।
विलिख्य परमेशानि ! तत्र मन्त्रं लिखेच्छिवे ! ॥७२॥
तल्लिहन् प्रजपेद्देवि ! सर्वशास्त्रार्थविद्भवेत् ।
अश्रुतानि च शास्त्राणि वेदादीन् पाठयेद् ध्रुवम् ॥७३॥
विना न्यासैर्विना पाठैर्विना ध्यानादिभिः प्रिये ! ।
चतुर्वेदाधिपो भूत्वा त्रिकालज्ञस्त्रिवर्षतः ॥७४॥
पठेन्नामसहस्रं यः कालीदर्शनभाग् भवेत् ।
भक्त्या पूज्य कुमारीश्च वेश्याकुलसमुद्भवाम् ॥७५॥
यद्यत् दत्तं कुमार्यै तु तदनन्तफलं भवेत् ।
कुमारीपूजनफलं मया वक्तुं न शक्यते ॥७६॥
वामभागे च संस्थाप्य जपेन्नामसहस्रकम् ।
सर्वसिद्धीश्वरो भूयान्नाऽत्र कार्य्या विचारणा ॥७७॥
श्मशानस्थो भवेत् स्वस्थो गलितं चिकुरं चरेत् ।
दिगम्बरः सहस्रञ्च सूर्यपुष्पं समानयेत् ॥७८॥
'ॐ ह्रींपत्नावति' पदं ततस्त्रैलोक्यनाम च ।
वार्त्तां च कथय द्वन्द्वं स्वाहान्तो मन्त्र ईरितः ॥७९॥
त्रिवर्षं पठतो देवि ! लभेद्भोगवतीं कलाम् ।
महाकालेन दष्टोऽपि चितामध्यगतोऽपि वा ॥८०॥
तस्या दर्शनमात्रेण चिरञ्जीवी नरो भवेत् ।
मृतसञ्जीवनीत्युक्त्वा मृतमुत्थापय द्वयम् ॥८१॥
स्वाहान्तो मनुराख्यातो मृतसञ्जीवनात्मकः ।
चतुर्वर्षं पठेद्यस्तु स्वप्नसिद्धस्ततो भवेत् ॥८२॥
ॐ ह्रींस्वप्नवाराहि कलिस्वप्ने कथयोच्चरेत् ।
अमुकस्याऽमुकं देहि क्लींस्वाहान्तो मनुर्मतः ॥८३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वप्नसिद्धा चतुर्वर्षात्तस्य स्वप्ने सदा स्थिता ।
चतुर्वर्षस्य पाठेन चतुर्वेदाधिपो भवेत् ॥८४॥
स्वस्मिन् कालीं तु सम्भाव्य पूजयेज्जगदम्बिकाम् ।
त्रैलोक्यविजयी भूयान्नात्र कार्य्या विचारणा ॥८५॥
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
रहस्यातिरहस्यञ्च रहस्यातिरहस्यकम् ॥८६॥
श्लोकार्द्धं पादमात्रं वा पादार्द्धञ्च तदर्धकम् ।
नामार्द्धं यः पठेद्देवि ! न वन्ध्यदिवसं न्यसेत् ॥८७॥
पुस्तकं पूजयेद्भक्त्या त्वरितं फलसिद्धये ।
न च मारीभयं तत्र न चाग्निर्वायुसम्भवम् ॥८८॥
न भूतादिभयं तत्र सर्वत्र सुखमेधते ।
कुंकुमाऽलक्तकेनैव रोचनाऽगुरु-योगतः ॥८९॥
भूर्ज्जपत्रे लिखेत् पुस्तं सर्वकामार्थसिद्धये ॥९०॥
इति गदितमशेषं कालिकावर्णरूपं,
पठति यदि भक्त्या सर्वसिद्धीश्वरः स्यात् ।
अभिनवसुखकामः सर्वविद्याभिरामो,
भवति सकलसिद्धिः सर्ववीरासमृद्धिः ॥९१॥
पठेन्नामसहस्रं तु त्रैलोक्यं मारयेद् ध्रुवम् ।
सद्भक्ताय प्रदातव्या विद्याराज्ञि शुभे दिने ॥९२॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ? ॥९३॥
इति श्रीकालीसहस्रनामस्तोत्रं समाप्तम् ।

मुद्रक—जगन्नाथ प्रिंटिंग; गायघाट, कामेश्वर महादेव, वाराणसी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छप रही है -

ग्रह शान्ती	– वायुनन्दन मिश्र	४०)
वाशिष्ठी हवन पद्धति	;,	१०)
ललिता स० नाम	,,	१२)
शान्ती मयूख	पं० वायुनन्दन	—
गयाश्राद्ध पद्धति	,,	८)
त्रिपीन्डी श्राद्ध पद्धति	,,	१२)
बारहो महीने का गनेश चौथ		२५)

प्राप्ति स्थान—

मास्टर खेलाड़ीलाल

कचौड़ी गली

वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection